# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीतृतीयवर्षम् (SEM- 5) **प्रश्नपत्रम्** – ८ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड** – **CE 3.5.10.** **समयः** - १० तः ०१

**दिनाङ्कः** - १२/१२/२०१८ **सन्दर्भग्रन्थः** – कादम्बरी (महाश्वेतावृत्तान्तः)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ निम्नेषु द्वयोः ससन्दर्भं व्याख्या कार्या।** १०

(१) अमथितोदधिजलसम्पदमिवान्तःप्रसन्नाम् असमस्तपदवृत्तिमिवाद्वन्द्वाम् , बौद्धबुद्धिमिव निरालम्बनाम् , वैदेहीमिव प्राप्तज्योतिःप्रवेशाम्, द्यूतकलाकुशलामिव वशीकृताप्तहृदयाम्, महीमिव जलभृतदेहाम् ।

(२) तत्र च तद्भुजयुगपरिपालितान्यनेकानि गन्धर्वशतसहस्राणि प्रतिवसन्ति । तेनैव चेदं चैत्ररथं नामातिमनोहरं काननं निर्मितम् , इदञ्चाच्छोदाभिधानमतिमहत् सरः खनितम्, अयञ्च भवानीपतिरुपरचितो भगवान् ।

(३) निदाघकालमिव साषाढम् , हिमसमयकाननमिव स्फुटितप्रियङ्गुमञ्जरीगौरम् , मधुमासमिव धवलतिलकभूतिविभूषितमुखम् , आत्मानुरूपेण सवयसा परेण देवतार्चनकुसुमान्युच्चिन्वता तापसकुमारेणानुगतम्, अतिमनोहरम्, स्नानार्थमागतं मुनिकुमारकमपश्यम् ।

**प्रश्नः – २ बाणभाट्टस्य परिचयं लिखत।** १०

**अथवा**

**कादम्बर्यनुसारं महाश्वेतावर्णनं लिखत।**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ निम्नेषु द्वयोः ससन्दर्भं व्याख्या कार्या।** १०

१. चञ्चले ! प्रदेशादस्मादिमामक्षतमालामदत्त्वा पदात् पदमपि न गन्तव्यम् इति । तच्च श्रुत्वाऽहमात्मकण्ठादुन्मुच्य मकरध्वजलास्यारम्भलीलापुष्पाञ्जलिमेकावलीम् – 'भगवन् ! गृह्यतामक्षतमाला' इति मन्मुखासक्तदृष्टेः शून्यहृदयस्यास्य प्रसारिते पाणौ निधाय स्वेदसलिलस्नातापि पुनः स्नातुमवातरम् ।

२. अथ मुहूर्तादिव तं तस्य रूपस्येव यौवनम् , यौवनस्येव मकरकेतनम्, मकरकेतनस्येव वसन्तसमयम्, वसन्तसमयस्येव दक्षिणानिलम् , अनुरूपं सखायं मुनिकुमारकं कपिञ्जलनामानं जराधवलितस्य कञ्चुकिनोऽनुमार्गेण चन्द्रातपस्येव बालातपमनुयायिनम्, अपश्यम् ।

३. अहो बत महच्चित्रम् ! तथा नामायमाशैशवाद् धीरप्रकृतिरस्खलितवृत्तिर्मम चान्येषाञ्च मुनिकुमारकाणां स्पृहणीयचरित आसीत्। अत्र तु इतर इव परिभूय ज्ञानम्, अवगणय्य तपःप्रभावम् उन्मूल्य गाम्भीर्यम्, मन्मथेन जडीकृतः। सर्वथा दुर्लभं यौवनमस्खलितमिति।

**प्रश्न: – ४  पुण्डरीकाय कपिञ्जलकृतमुपदेशं वर्णयत**  १०

**अथवा**

**बाणभट्टस्य गद्यवैशिष्ट्यं निरूपयत।**

## तृतीयान्विति:(Unit - 3)

**प्रश्न: – ५  निम्नेषु द्वयो: ससन्दर्भं व्याख्यां लिखत।**  १०

१) 'पुण्डरीक ! निष्ठुरोऽसि एवमप्यार्त्तां न गणयसि माम् इत्युपलभमाना मुहुरेनमन्वयम्। मुहु: पर्यचुम्बं मुहुर्मुहु कण्ठे गृहीत्त्वा व्याक्रोशम् " 'आ: पापे ! त्वयाऽपि मत्प्रत्यागमनकालमस्यासवो न रक्षिता: " इति तामेकावलीमगर्हयम्।

२) 'भगवति ! मया पापेन तवायं पुनरभिनवतां नीत: शोक: येनेदृशीं दशामुपनीताऽसि। तदलमनया कथया। संह्वियतामियम्। अह्मप्यसमर्थ: श्रोतुम्। अतिक्रान्तान्यपि हि सङ्कीर्त्यमानानि प्रियजनविश्वासवचनान्यनुभवसमां वेदनामुपजनयन्ति सुहृज्जनस्य दु:खानि। तन्नार्हसि कथंकथमपि विधृतानिमानसुलभानसून् पुनश्शोकानल इन्धनतामुपनेतुम्' इति।

३) अपरेद्युश्च कुतोऽपि समुपलब्धवृत्तान्तस्तात: सहाम्बया सह बन्धुवर्गेणागत्य सुचिरं कृताक्रन्दस्तैस्तैरुपायै: अभ्यर्थनाभिश्च बह्वीभि:, उपदेशैश्चानेकप्रकारै:, सान्त्वनैश्च नानाविधै: गृहागमनाय मे महान्तं यत्नमकरोत्।

**प्रश्न: – ६  पुण्डरीकनिधने कपिञ्जलस्य विलापं वर्णयत।**  १०

**अथवा**

**पुण्डरीकनिश्चने महाश्वेताया विलापं वर्णयत।**

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्न: – ७  निम्नेषु दशानां लघूत्तराणि लिखत।**  १०

१) कादम्बर्या: रचयिता क: ?

२) कादम्बर्या: काव्यप्रकार: क: ?

३) किं कवीनां निकषं वदन्ति?

४) केनोच्छिष्टं जगत्सर्वम्?

५) अप्सरसां कति कुलानि सन्ति?

६) मधुमास इति शब्दस्य कोऽर्थ: ?

७) पुण्डरीकस्य पितु: नाम किम्?

८) पुण्डरीकस्य मातु: नाम किम्?

९) पुण्डरीक इति नामकरणे को हेतु: ?

१०)पारिजातकुसुममञ्जरी कया दत्ता ?

११) तरलिका का अस्ति ?

१२) महाश्वेताया मातु: नाम किम्?

१३) माहाश्वेताया पितु: नाम किम्?

१४) पुण्डरीकस्य सखा क: अस्ति ?

१५) उच्चलिताया महाश्वेताया दुर्निमित्तनिवेदकं किम् अस्पन्दत?

*****************